**C**

Question Paper Serial No. **500**

ಒಟ್ಟು ಮುದ್ರಿತ ಪುಟಗಳ ಸಂಖ್ಯೆ : 12 ]
Total No. of Printed Pages : 12 ]
ಒಟ್ಟು ಪ್ರಶ್ನೆಗಳ ಸಂಖ್ಯೆ : 47 ]
Total No. of Questions : 47 ]

**ಸಂಕೇತ ಸಂಖ್ಯೆ: 67-S**

**Code No. : 67-S**

**CCE PF**
**UNREVISED**
**FULL SYLLABUS**
**NSR & NSPR**

# ವಿಷಯ : ತೃತೀಯ ಭಾಷೆ — ಸಂಸ್ಕೃತ

# Subject : Third Language — SANSKRIT

# तृतीयभाषा — संस्कृतम्

**(ಖಾಸಗಿ ಅಭ್ಯರ್ಥಿ / ಎನ್.ಎಸ್.ಆರ್. & ಎನ್.ಎಸ್.ಪಿ.ಆರ್.)**

**( Private Fresh / NSR & NSPR )**

ದಿನಾಂಕ : 12. 04. 2023 ] [ Date : 12. 04. 2023

ಸಮಯ : ಬೆಳಗ್ಗೆ 10-30 ರಿಂದ ಮಧ್ಯಾಹ್ನ 1-30 ರವರೆಗೆ ] [ Time : 10-30 A.M. to 1-30 P.M.

ಗರಿಷ್ಠ ಅಂಕಗಳು : 100 ] [ Max. Marks : 100

***ಪರೀಕ್ಷಾರ್ಥಿಗಾಗಿ ಸಾಮಾನ್ಯ ಸೂಚನೆಗಳು :***

1. ಈ ಪ್ರಶ್ನೆಪತ್ರಿಕೆಯು ವಸ್ತುನಿಷ್ಠ ಮತ್ತು ವಿಷಯನಿಷ್ಠ ಮಾದರಿಯ 47 ಪ್ರಶ್ನೆಗಳನ್ನು ಹೊಂದಿದೆ.
2. ಈ ಪ್ರಶ್ನೆಪತ್ರಿಕೆಯನ್ನು ಹಿಮ್ಮುಖ ಜಾಕೆಟ್ ಮೂಲಕ ಮೊಹರು (ಸೀಲ್) ಮಾಡಲಾಗಿದೆ. ಪರೀಕ್ಷೆ ಪ್ರಾರಂಭವಾಗುವ ಸಮಯಕ್ಕೆ ನಿಮ್ಮ ಪ್ರಶ್ನೆಪತ್ರಿಕೆಯ ಬಲಬದಿ ಪಾರ್ಶ್ವವನ್ನು ಕತ್ತರಿಸಿ, ಪ್ರಶ್ನೆಪತ್ರಿಕೆಯಲ್ಲಿ ಎಲ್ಲಾ ಪುಟಗಳು ಇವೆಯೇ ಎಂದು ಪರೀಕ್ಷಿಸಿಕೊಳ್ಳಿ.
3. ವಸ್ತುನಿಷ್ಠ ಮತ್ತು ವಿಷಯನಿಷ್ಠ ಮಾದರಿಯ ಪ್ರಶ್ನೆಗಳಿಗೆ ಕೊಟ್ಟಿರುವ ಸೂಚನೆಗಳನ್ನು ಪಾಲಿಸಿ.
4. ಬಲ ಭಾಗದಲ್ಲಿ ಕೊಟ್ಟಿರುವ ಅಂಕಿಗಳು ಪ್ರಶ್ನೆಗಳಿಗಿರುವ ಪೂರ್ಣ ಅಂಕಗಳನ್ನು ತೋರಿಸುತ್ತವೆ.
5. ಪ್ರಶ್ನೆಪತ್ರಿಕೆಯನ್ನು ಓದಿಕೊಳ್ಳಲು 15 ನಿಮಿಷಗಳ ಕಾಲಾವಕಾಶವು ಸೇರಿದಂತೆ, ಉತ್ತರಿಸಲು ನಿಗದಿಪಡಿಸಲಾದ ಸಮಯವನ್ನು ಪ್ರಶ್ನೆಪತ್ರಿಕೆಯ ಮೇಲ್ಭಾಗದಲ್ಲಿ ಕೊಡಲಾಗಿದೆ.

***परीक्षार्थिनां सामान्यसूचना:***

1. अस्मिन् प्रश्नपत्रे वस्तुनिष्ठाः विषयनिष्ठाश्च सप्तचत्वारिंशत् (47) प्रश्नाः सन्ति ।
2. इदं प्रश्नपत्रं विपरीतेन आवरणेन मुद्रिताङ्कमस्ति । परीक्षासमये प्रश्नपत्रमुद्घाटयितुं दक्षिणपार्श्वेन कर्तयत । प्रश्नपत्रस्य पृष्ठानि पूर्णानि सन्ति वा इति अवलोकयत ।
3. वस्तुनिष्ठानां विषयनिष्ठानां च प्रश्नानां विषये निर्दिष्टाः नियमाः अनुपालनीयाः ।
4. प्रश्नानां प्रति अधिकृताः अङ्काः पार्श्वे लिखिताः सन्ति ।
5. प्रश्नपत्रमुत्तरयितुं निर्धारितः समयावधिः प्रश्नपत्रस्य उपरि भागे लिखितः अस्ति । पञ्चदशनिमेषाः प्रश्नपत्रस्य पठनार्थं निर्धारिताः सन्ति ।

[ Turn over

इतः कर्तयत

**TEAR HERE TO OPEN THE QUESTION PAPER**
प्रश्नपत्रमुद्घाटयितुमितः कर्तयत

**Tear here**

**I. अधोलिखितप्रश्नेभ्यः चत्वारः विकल्पाः प्रदत्ताः । तेषु समुचितं विकल्पं चित्वा क्रमाक्षरेण सह उत्तरपत्रिकायां लिखत ।** **10 × 1 = 10**

1. 'महाबलः' अस्य पर्यायपदम् इदं भवति ।

   (A) विष्णुः (B) शिवः

   (C) ब्रह्मा (D) विनायकः

2. "नूतनम्" अस्य विरुद्धार्थकं पदम् इदं भवति ।

   (A) पुरातनम् (B) नवीनम्

   (C) उपवनम् (D) शरीरम्

3. "एकाग्रता" अत्र एषः लिङ्गः भवति ।

   (A) पुल्लिङ्गः (B) स्त्रीलिङ्गः

   (C) नपुंसकलिङ्गः (D) अन्यलिङ्गः

4. 'प्रायच्छत्' अत्र एषः लकारः भवति ।

   (A) लट्लकारः (B) लोट्लकारः

   (C) लङ्लकारः (D) लृट्लकारः

5. 'आगच्छन्ति' अत्र एषः पुरुषः वर्तते ।

(A) प्रथमपुरुषः (B) मध्यमपुरुषः

(C) उत्तमपुरुषः (D) अन्यपुरुषः

6. 'अस्मदीयः' अस्य विवरणम् एवं भवति ।

(A) अस्माकं वयम् (B) अस्माकं त्वम्

(C) अस्माकम् अयम् (D) युष्माकम् अयम्

7. '<u>कन्दुकेन</u> क्रीडति' । अत्र रेखाङ्कितपदस्य कारकम् इदं भवति ।

(A) सम्प्रदानकारकम् (B) अपादानकारकम्

(C) अधिकरणकारकम् (D) करणकारकम्

8. 'अर्जुनः कर्णं दृष्ट्वा शिबिरं प्राविशत् ।' अत्र कृदन्तपदम् इदं भवति ।

(A) अर्जुनः (B) प्राविशत्

(C) शिबिरं (D) दृष्ट्वा

9. यथाविधि, अनुरूपम्, आमुक्ति, चक्रपाणिः । अत्र समूहेतरं पदम् इदं भवति ।

(A) यथाविधि (B) अनुरूपदम्

(C) आमुक्ति (D) चक्रपाणिः

10. 'रूपम् अस्य अस्तीति-रूपवान्' अत्र एषः प्रत्ययः भवति ।

(A) 'वतुप्' प्रत्ययः (B) 'इष्ठन' प्रत्ययः

(C) 'छ' प्रत्ययः (D) 'म' प्रत्ययः

**II. चतुर्थं पदं लिखत । 5 × 1 = 5**

11. पुस्तकमेलां गतवती – प्रभा :: ग्रामोत्सवं गन्तुम् इच्छति – .................... ।

12. श्रीशङ्कराचार्यः – अद्वैतसिद्धान्तप्रतिपादकः :: श्रीरामानुजाचार्यः – ............ ।

13. रघुवंशम् – कालिदासः :: चम्पूरामायणम् – ......................... ।

14. पूज्यनदी – गङ्गा :: पूज्यः शैलः – ..................... ।

15. ढुण्ढिराजः – गणेशः :: ज्योतिषां पतिः – .......................... ।

**III. एकवाक्येन उत्तरं लिखत ।** **5 × 1 = 5**

16. अपूर्णानि राजगोपुराणि केन निर्मितानि ?

17. कर्णार्जुनयोः कीदृशं युद्धं प्रवृत्तम् ?

18. सीतां कः अपहृतवान् ?

19. लोकपाली कः ?

20. उपमालङ्कार कति अंशाः भवन्ति ?

**IV. द्वित्रैः वाक्यैः उत्तरं लिखत ।** **6 × 2 = 12**

21. कीदृशः महाबलः वः पातु ?

22. कतिविधाः जनाः देवं भजन्ते ? ते च के ?

23. रघुवंशीयराजाः कथम् आसन् ?

24. खलसज्जनानां मैत्री कीदृशी भवति इति वर्णयत ।

**अथवा**

सन्तः कीदृशाः भवन्ति इति विवृणुत ।

25. गणेशः कीदृशः ?

26. कालान्तरे कानि विनश्यन्ति ?

**V. संस्कृतभाषया अनुवादं कुरुत ।** **1 × 2 = 2**

27. ವಿದ್ಯಾರ್ಥಿಗಳು ಪ್ರತಿದಿನ ಶಾಲೆಗೆ ಹೋಗುತ್ತಾರೆ. ಶಾಲೆಯಲ್ಲಿ ಸಂಸ್ಕೃತ ಭಾಷೆಯನ್ನು ಕಲಿಯುತ್ತಾರೆ.

Students go to school everyday. They learn Sanskrit language in the school.

**VI. कर्नाटकभाषया आङ्ग्लभाषया वा अनुवादं कुरुत ।** **1 × 2 = 2**

28. पुरा भोजभूपालस्य सभायाम् अनेके कवयः आसन् । तेषामेकः कालिदासः नाम ।

**VII.** 29. **विग्रहवाक्यं लिखत ।** **1 × 2 = 2**

a) शूलपाणिः ।

b) लम्बोदरः ।

**अथवा**

**समस्तपदं लिखत ।**

a) चन्द्रः शेखरे यस्य सः = .................

b) विघ्नानाम् अभावः = ..................

**VIII. लक्षणं विलिख्य अलङ्कारस्य नाम लिखत ।** **1 × 2 = 2**

30. 'सागरः सागरोपमः' ।

**IX. यथानिर्देशम् उत्तरं त्रिचतुरैः वाक्यैः लिखत ।** **2 × 3 = 6**

31. "गच्छ अद्य अहं पुस्तकं न दास्यामि" ।

कः पाठः ? कः अवदत् ? कम् अवदत् ?

32. "भवतः का गतिः भवेत्" ?

कः पाठः ? कः अवदत् ? कम् अवदत् ?

**X.** 33. **सन्धिं विभज्य नाम लिखत ।** **1 × 3 = 3**

a) योगेनान्ते

b) युगादारभ्य

c) गुरुर्ब्रह्मा ।

**XI. प्रस्तारं विलिख्य गणविभागं कृत्वा छन्दोनाम लिखत ।** **1 × 3 = 3**

34. सप्राण एव वसतीति विचित्रमेतत् ।

**XII. कवेः देश-काल-कृतीनां विषये त्रिचतुरैः वाक्यैः उत्तरं लिखत ।** **2 × 3 = 6**

35. भासः ।

**अथवा**

कालिदासः ।

36. भोजराजः ।

**XIII. पद्यपाठस्य नाम विलिख्य तात्पर्यं पञ्चषैः वाक्यैः कर्नाटकभाषया, संस्कृतभाषया, आङ्ग्लभाषया वा लिखत ।** **4 × 3 = 12**

37. कर्मण्येवाधिकारस्ते मा फलेषु कदाचन ।

मा कर्मफलहेतुर्भूः मा ते सङ्गोऽस्त्वकर्मणि ।।

38. स वेलावप्रवलयां परिखीकृतसागराम् ।

अनन्यशासनामुर्वीं शशासैकपुरीमिव ।।

**6**

39. अशनं भिन्नं वसनं भिन्नम्

रूपं भिन्नं रीतिरपि ।

भिन्नं भाग्यं भिन्नो वर्णः

भिन्नं सर्वं भेददृशे ।।

40. सदयं हृदयं यस्य भाषितम् सत्यभूषितम् ।

कायः परहिते यस्य कलिस्तस्य करोति किम् ।।

**XIV. पद्यपाठस्य नाम विलिख्य पद्यं पूरयत ।** **1 × 3 = 3**

41. शीलं ................................................................................ ।

................................................................................ निधिः ।।

**XV. दशवाक्यैः उत्तरं कर्नाटकभाषया, आङ्ग्लभाषया, संस्कृतभाषया वा लिखत।**

**3 × 4 = 12**

42. विश्वसंस्कृतपुस्तकमेलायाः वैभवं वर्णयत ।

43. भारतस्य आदर्शनारी 'उभयभारती ' इति विषयं सङ्गृह्य लिखत ।

**अथवा**

'विक्रमः वेतालश्च' इति कथां सङ्गृह्य लिखत ।

44. मेलुकोटे क्षेत्रम् अधिकृत्य विवृणुत ।

**XVI. अधोलिखितम् अनुच्छेदं पठित्वा प्रश्नान् उत्तरत ।** **1 × 5 = 5**

45. एकस्मिन् नगरे कश्चन शिल्पी आसीत् । सः यां यां शिलां पश्यति स्म तया शिलया सुन्दरीं मूर्तिं निर्माय विक्रीणीते स्म ।

एकदा सः काञ्चित् महतीं शिलाम् अपश्यत् । अहो एषा शिला अतीव उत्तमा अस्ति । एतया उत्तमं विग्रहं करोमि, इति चिन्तयति । सः तां शिलां खण्डयित्वा-भागद्वयं कृतवान् । तयोः एकं भागं गृहीत्वा विग्रह-निर्माणे उद्युक्तः अभवत् ।

परं सः शिलाभागः शिल्पिनः प्रहारं न सहते स्म । ततः दूरं गन्तुं प्रयत्नं करोति स्म । शिल्पी बहुधा प्रयत्नं कतवान् । अन्त तां परित्यज्य अन्यं भागं स्वीकृतवान् । महता परिश्रमेण निरन्तरं कार्यं कृत्वा तस्यां शिलायां सुन्दरः गणेशविग्रहः निर्मितः ।

i) नगरे कः आसीत् ?

ii) का अतीव उत्तमा अस्ति ?

iii) शिल्पी कां भागद्वयं कृतवान् ?

iv) महता परिश्रमेण कः निर्मितः ?

v) कः बहुधा प्रयत्नं कृतवान् ?

**XVII. द्वादशवाक्यैः प्रबन्धं लिखत ।** **1 × 5 = 5**

46. कर्नाटकराज्योत्सवः ।

**अथवा**

परिसरः ।

**XVIII. पत्रं लिखत ।** **1 × 5 = 5**

47. धारवाडमण्डलस्य सर्वकारीयविद्यालयस्य छात्रः/छात्रा इति मत्वा दिनचतुष्टयस्य विरामं सम्प्रार्थ्य मुख्योपाध्यायं प्रति पत्रं लिखत ।

**अथवा**

बेङ्गलूरुमण्डलस्य सर्वकारीयविद्यालयस्य छात्रः/छात्रा इति मत्वा अध्ययनविषये मङ्गलूरुनगरे वर्तमानं मित्रं प्रति पत्रं लिखत ।